श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कवितार्किकसिंह सर्वतन्त्रस्वतन्त्र
श्रीमद्वेदान्तदेशिक विरचितं महाकाव्यं

# ॥ यादवाभ्युदयम् ॥

## ॥ चतुर्विंशः सर्गः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ यादवाभ्युदयम् ॥

## ॥ चतुर्विंशः सर्गः ॥

अथ निजविभवादजातशत्रौ
    प्रशमितशत्रुबले निवेश्य भूमिम्।
परिचरणफलं प्रभुः प्रयच्छन्
    अमितगुणाभिररंस्त वल्लभाभिः॥ २४.१ ॥

क्रतुविधिनियतोऽप्यकर्मवश्यः
    परिचितकामरसोऽपि वीतरागः।
नगरवसतिरप्यशेषवासः
    कथमिव केन विभुः स वर्णनीयः॥ २४.२ ॥

अनुगमितमिदं स्वदाररक्षाम्
    अनघमनोभवतन्त्र माननीयम्।
निरुपधिकरसस्य नेतुरासीत्
    नृपतिमहर्षिभिरञ्चितं चरित्रम्॥ २४.३ ॥

श्रुतिशतमहिते पदे परस्मिन्
    सितजलधौ रविमण्डले च सिद्धाम्।
बहुमतिमतिशय्य सा बभासे
    नरकरिपोरवरोधभूमिरग्र्या॥ २४.४ ॥

निधिगणमुखवान्तनिष्कराशिः
    प्रचितगुणा मणिभिः स्यमन्तकाद्यैः।
प्रमुदितमहिषीगणेन चक्रे
    यदुनगरी विभुना निवासभूमिः॥ २४.५ ॥

अविकलविभवस्य विश्वमूर्तेः
    अधिवसनं यदुवीरराजधान्याम्।

अनुदिनमनपायिनीं प्रतिष्टाम्
अभिलषतामनुचिन्तनीयमासीत्॥ २४.६ ॥

सह मुनिभिरुपास्त धर्ममाद्यं
व्यवहरणानि ददर्श वेदविद्भिः।
अरमत च वधूजनैर्यथार्हं
बहुतनुरक्रमतो विचित्रशक्तिः॥ २४.७ ॥

अपि युगपदवाप्तनैकदेहैः
उपनतयोगबलैः स्वकर्मनिघ्नैः।
धृतबहुवपुषा जगद्विधात्रा
जितकरणेन तु भुज्यते तदर्थः॥ २४.८ ॥

यदुपतिरधिरूढचन्द्रशालः
सह दयिताभिरनन्यमानसाभिः।
जलनिधिमभितः प्रदर्शयंस्ताः
निजमिव धाम निवेदयाम्बभूव॥ २४.९ ॥

निजपदमनपायमाश्रितानां
प्रभुरपवर्गदशामिव प्रयच्छन्।
अमितबहुगुणामनन्यलभ्याम्
अतनुत कामपि सम्पदं प्रियाणाम्॥ २४.१० ॥

स्वयमुदवसिते स्ववासधन्ये
त्रिषु भुवनेषु समामिवाद्भुतानाम्।
अतनुत समवायमात्मयोगात्
अतिशयिनीमथवा विभुः समृद्धिम्॥ २४.११ ॥

विधिसदनमुखेष्वदृष्टपूर्वां
प्रथितपरस्परसम्मतिं समृद्धिम्।
यदुपतिदयितागृहेषु पश्यन्
मुदमभजद्भुवि नारदो मुनीन्द्रः॥ २४.१२ ॥

ललितरुचिषु कल्पवृक्षपोतैः
उपवनराजिषु तस्य सञ्चरिष्णोः।
अदधुरवयवैर्मुदं मुरारेः
अनुकृतपुष्पफलादिकैस्तरुण्यः॥ २४.१३ ॥

अधिगतकुसुमापचायलीलः
प्रमदवनानि विभूषयन् स्वधाम्ना।
प्रजनितमदनो मनस्विनीभिः
गुणसुरभिः सुरभिः स्वयं स मेने॥ २४.१४ ॥

परिपणमिव मन्मथोत्सवानां
प्रथमविकस्वरपद्मदर्शनीयम्।
अनुदितबहुविभ्रमं वधूनाम्
अभिनवयौवनमन्वभुङ्क्त नाथः॥ २४.१५ ॥

अमृतमयपयः परिप्लुतानां
विषमगुणेषु विहारवापिकानाम्।
कमलकुवलयादिषु प्रियाणां
मुखनयनस्मितकान्तिमभ्यनन्दत्॥ २४.१६ ॥

अवितथमहिमा निजप्रसादात्
अनघमनोरथतोषितासु तासु।
स्वपरिजनतया सुरैर्नियुक्ताः
निरदिशदप्सरसो निदेशभाजः॥ २४.१७ ॥

बहिरुपनगरं बलानि दृष्ट्वा
सह यदुभिः समये निवर्तमानम्।
ददृशुरधिगवाक्षमेकचित्ताः
रथतुरगादिषु रामपश्चिमं तम्॥ २४.१८ ॥

विधिवदनुविधाय देवयात्रां
प्रतिपुरवीथिपरिक्रमेण दृश्यम्।

पतिमनुददृशुस्तमेव दूरात्
    अचरमदेवमनन्यदेवतास्ताः॥ २४.१९ ॥

बहुविधमुपहारजातमग्र्यं
    सुरपतिभिः स्वयमाहृतं मुकुन्दः।
अपि गगनचरैरदृष्टपूर्वं
    सममवरोधजनस्य संविभेजे॥ २४.२० ॥

उपचितशिखरे वदान्यरत्नैः
    उचितगुहाश्रितहंसतूलतल्पे।
बहुरिव स बभौ विहारशैले
    प्रतिमणिभित्तिविभक्तचारुबिम्बः॥ २४.२१ ॥

युगपदखिलमादरेण साक्षात्
    युवतिजनस्य निदर्शयन् मुकुन्दः।
असकृदुपगमय्य चित्रशालाः
    अनघसमाधिदशामिवाततान॥ २४.२२ ॥

अनितरमनसां स्ववल्लभानां
    नरकजिता निरपायवैभवेन।
भवभयविनिवारिणी स्वभक्तिः
    ललितविहारमुखेन लम्भिताऽभूत्॥ २४.२३ ॥

प्रमुदितविबुधाहृतप्रक्लृप्तैः
    कनकसरोजवनैरलङ्कृतानाम्।
अतिशयमवरोधदीर्घिकाणाम्
    अधिसुरसिन्धु समीक्षितं निदध्यौ॥ २४.२४ ॥

विहरति वनिताजने तदीयैः
    अपलपितामवलोकनप्रभावैः।
पुनरपि हरिनीलरत्नभासा
    दधुरसितोत्पलसम्पदं सरस्यः॥ २४.२५ ॥

स्थिरधृतिवधिरोप्य रत्नडोलां
    गुणघटितामिव माधवः स्वमायाम्।
अगमयत गतागतान्यभीक्ष्णं
    सुकृतजुषः स्वयमङ्गनाः स्वतन्त्रः॥ २४.२६ ॥

रुचिरकनकशृङ्गवक्त्रवान्तैः
    प्रतितनु कुङ्कुमवारिभिः प्रसिञ्चन्।
अजनयदनुरागयोगमन्तः
    बहिरपि तोयविहारतो वधूनाम्॥ २४.२७ ॥

नवमणिपरिकल्पितेषु नाथः
    कमलवनान्तरकेलिमन्दिरेषु।
श्रिय इव सुदृशो गृहीतपद्माः
    हृदि निदधे पुरुषोत्तमः प्रतीतः॥ २४.२८ ॥

दिशि दिशि मकरन्दवर्षदिग्धां
    विविधपरागविभक्तचूर्णचित्राम्।
भुवमभजत साकमङ्गनाभिः
    पुलकितदृष्टिषु पुष्पमण्डपेषु॥ २४.२९ ॥

अनुविहितमहोत्सवो यथार्हं
    वितरणतोषितवन्दिबन्धुवर्गः।
परिणयनविधिं लतावधूनाम्
    अतनुत चूतवरैः प्रियार्पितानाम्॥ २४.३० ॥

सुतबहुमतभागिनां शुकानाम्
    उपहृतदिव्यरसोपभोगभाजाम्।
श्रुतिमधुरगिरां स्वशिक्षितानाम्
    अतिशयसिद्धिमदर्शयत् प्रियाभ्यः॥ २४.३१ ॥

अनुकृतनिजशक्तिभिः प्रियाभिः
    सह गुणबन्धविभक्तसन्निवेशैः।

मुहुरिह निपतद्भिरुत्पतद्भिः
    करणवशैरिव कन्दुकैरदीव्यत्॥ २४.३२॥

निजयुवतिषु यद्यपि त्रिधामा
    नयनपिधानविहारमाजहार।
न तदनुचरितं तथाऽपि ताभिः
    त्रिभुवनदृष्टिनिरोधशङ्किनीभिः॥ २४.३३॥

श्रुतिविहितमवन्ध्ययन् स्वधर्मं
    प्रतिदिनमन्यपरो यदा बभूव।
तदुपचरणतस्तदाऽपि तासां
    समजनयत् प्रियभोगमेव कालः॥ २४.३४॥

मणिपरुवकमञ्जुलस्तनीभिः
    मधुसमयापगमे वराङ्गनाभिः।
सितमणिविहितान् स यन्त्रधारा-
    व्यतिकरशीतलितानभुङ्क्त सौधान्॥ २४.३५॥

स्फटिकसदनदीप्तिदत्तहस्तां
    मुरभिदसेवत सादरं सदारः।
अपजलदनिशोदितस्य शोभां
    हलधरकान्तिभृतस्तुषारभासः॥ २४.३६॥

अगुरुभिरसितैरनूरुगौरैः
    नवघुसृणैरपि निर्विवेश नाथः।
हिमऋतुमवरोधसुन्दरीणां
    स्तनपरिरम्भसमर्पितैर्विलिप्तः॥ २४.३७॥

अनलशकटिकाभिरप्यजय्यं
    शिशिरसमीरणमञ्जसा जिगाय।
अविरलपरिरम्भलम्भनीयैः
    स्तनकलशोष्मभिरात्मवल्लभानाम्॥ २४.३८॥

उपनिषदुपदेशसाभिलाषैः
उपचरितो मुनिभिः सनन्दनाद्यैः।
रतिपतिसमयस्थितो वधूनां
ललितकलागमदेशिको बभूव॥ २४.३९ ॥

कलमधुरगिरां कलाप्रसङ्गात्
अतिमदनोपनिषत् परं रहस्यम्।
प्रियहितरुचिराक्षरं प्रियाणां
श्रुतिषु चकार शिखामणिः श्रुतीनाम्॥ २४.४० ॥

निरुपधिकनिजप्रभावगर्भं
परिषदि विश्वपतिः प्रियासहायः।
किमपि निशमयाम्बभूव गीतं
प्रमुदितकिन्नरदम्पतिप्रयुक्तम्॥ २४.४१ ॥

मृदुकरतललीलया मृदङ्गान्
असमयनर्तितनीलकण्ठयूथान्।
ध्वनयति दयिते विडूरभूमेः
श्रियमिव ताः पुलकोद्गमैरपुष्यन्॥ २४.४२ ॥

करकमलपरिग्रहेण धन्यं
वरतनुसंसदि वादयन् विपञ्चीम्।
अविदितगमनाय गायकैः स्वैः
उपरतगीतिभिरुन्मुखैः सिषेवे॥ २४.४३ ॥

श्रुतिमधुसुभगैरदीनहृद्यैः
श्रुतघननादशिखण्डिनीगणश्रीः।
मधुरिपुवनिताजनः समाजे
ध्वनिभिरमाद्यत दिव्यदुन्दुभीनाम्॥ २४.४४ ॥

सललितकरणाङ्गहारहृद्यं
सह दयिताभिरुदारदिव्यनाट्यम्।

अनुदिनमनिमेषदर्शनीयं
जितमधुरप्सरसां ददर्श नृत्यम्॥ २४.४५ ॥

अभिनयमभिनन्द्य नर्तकीनां
स्वयमुपदिष्टमलङ्घितोपदेशम्।
पुनरपि मुदितस्तमेव युञ्जन्
अविदितपूर्वमिवादरादपश्यत्॥ २४.४६ ॥

प्रतियुवतिगृहीतनैकरूपः
प्रणयवतीभिरनन्य इत्युपेतः।
अपहृतमणिपादुकः कयाचित्
पदमपि गन्तुमशक्नुवन्निवासीत्॥ २४.४७ ॥

अनवहिततया सखीसमक्षं
द्रुतमुपहूय समाख्ययेतरस्याः।
मुषितमनसमद्भुतैर्विलासैः
इदमपि नाम तवेत्युवाच मुग्धाम्॥ २४.४८ ॥

समुचितदिनलङ्घनं सपत्न्याः
परिपणितं स्वयमभ्युपेत्य नाथः।
स्मितमधुरमुखो जितः कयाचित्
विवश इवाक्षविहारतो बभूव॥ २४.४९ ॥

अनुगतनिजबिम्बमेनमन्या
मणिमुकुरस्थमवेक्ष्य मन्दहासम्।
न खलु तदवलोकनाय पश्चात्
व्यतनुत साचिविधिं तदेकतृप्ता॥ २४.५० ॥

पुलकिनि कुचकुड्मले परस्याः
कथमपि साध्वसकम्पिताग्रहस्तः।
स्थिरचरजगदेकदिव्यशिल्पी
विषमतमं विलिलेख पत्रभङ्गम्॥ २४.५१ ॥

मृदुसुरभिसुजातबन्धुराभिः
प्रणिदधदग्रनिबद्धपङ्कजाभिः।
मुहुरसितदृशां स्वकण्ठयोग्यां
भुजलतिकाममिमीत मालिकाभिः॥ २४.५२॥

अभजत स च ताश्च दूतिकानाम्
अमृतपरिप्लुतभेषजायमानैः।
प्रतिदिनमिदमादिमं प्रमोदं
प्रणयविरोधसितासितैर्वचोभिः॥ २४.५३॥

निजपदपरिचार काङ्क्षिणीभिः
कतिषु भवेषु समर्चिताङ्घ्रिपद्मः।
प्रतिविधिमभजत् प्रसाधिकावत्
प्रियपरिकर्मविधानतः स तासाम्॥ २४.५४॥

निजसमुदयसम्भवैर्निशायां
प्रणयपयोनिधिवीचिकाविसर्पैः।
प्रणतिभिरिव विभ्रमैः प्रियाणां
बहुमतिभेदमवाप यादवेन्दुः॥ २४.५५॥

शरदुपगमशोधिता इवापः
तुहिनकरोदयनिर्मला इवाशाः।
मुरभिदुपगमप्रशान्तखेदाः
प्रतिययुरुन्मनसस्तमायताक्ष्यः॥ २४.५६॥

अमृतमयमिवोदधिं तमुच्चैः
अनुसखि लोचनशुक्तिभिः पिबन्त्यः।
अवशनियतचित्तवृत्तिमेकाम्
अदधुरदृष्टपरस्परामवस्थाम्॥ २४.५७॥

स्मरजनकतनुः स्वदर्शिनीनां
ननु विरहः सुदृशां निमेष एव।

इति किल विगणय्य विश्वकर्ता
    नियतमकल्पयदप्सरस्त्वमासाम्॥ २४.५८ ॥

अनुचरबहुमानमाप्तुकामैः
    अवसरविद्भिरनुस्मृतात्मरक्षैः।
अनुदिनमुपनीतमादितेयैः
    अमृतमपाययत प्रियाः प्रतीतः॥ २४.५९ ॥

प्रियवचनशतैरुदारवादी
    रहसि मनः श्रुतिरञ्जकैर्विचित्रैः।
मुखकमलमधुपमैः प्रकामं
    मदमुदिता इव मानिनीरकार्षीत्॥ २४.६० ॥

अतिशयितगुणैः प्रियोपभोगात्
    वसनविभूषणमालिकादिभिस्ताः।
मुदमधिकतमां दधुस्तरुण्यः
    प्रणयरसो हि रसप्रकर्षहेतुः॥ २४.६१ ॥

अभिलपनमनस्क्रियातिपाति-
    न्यनुबुभुजे यदुपुङ्गवेन तासाम्।
अतिशयमितरेतरं प्रयच्छ-
    न्त्यभिनवयौवनसम्पदप्रकम्प्या॥ २४.६२ ॥

अजनिषत कुतो नु भागधेयात्
    त्रिभुवनमङ्गलदीपिकाः शुभाङ्ग्यः।
यदुपतिसहधर्मचारिणीभिः
    सुखमनघं भुवि याभिरन्वभावि॥ २४.६३ ॥

अधिभुजगपति श्रियोपभुक्तं
    युगपरिपाकविहारिणं युवानम्।
नरपतिबहुमानतो नताङ्ग्यः
    सुलभमिवान्वभवन् स्वतल्पभाजम्॥ २४.६४ ॥

शकयुवतिकपोलपाण्डराभैः
शशिशकलैरिव नागवल्लिपत्रैः।
स्मरसुभटयशोनिभैरनन्दत्
युवति जनोपहृतैस्तदर्पितैस्ताः॥ २४.६५ ॥

जगदुपजननादिजातभूम्नः
क इव वधूजनमोहनो विहारः।
कथमिव स कुतश्च कीर्तनीयः
प्रथितमनोभवतन्त्रपारदृश्वा॥ २४.६६ ॥

यतिभिरनुबुभूषितः स ताभिः
यदुपतिरद्भुतरूपवेषशीलः।
निरुपधिकरसामृतौघसिन्धुः
सततमपूर्वमपूर्वमन्वभावि॥ २४.६७ ॥

हरिपरिचरणेन तोषितानां
हरिणदृशां विभवं विभावयन्तः।
अपजहसुरवाप्तसंयमाः स्वान्
अपरिमितानणिमादिसिद्धिभेदान्॥ २४.६८ ॥

सरित इव मृगीदृशस्तमेकं
महितगुणौघमहोदधिं भजन्त्यः।
अबिभरुरनपायमैकरस्यं
मुनिगणितश्च स एव मुक्तभोगः॥ २४.६९ ॥

अनुभवरसतो जगत्प्रसूतेः
अपचितसुप्तिसुषुप्तिसम्भवास्ताः।
वितमसि विषये स्थिता इवासन्
विरतिविहीनविहारजागरेण॥ २४.७० ॥

प्रतिदिनमितरेतरानुगुण्यात्
प्रचितमयोगवियोगसम्प्रयोगैः।

रसमधिकमवापुरायताक्ष्यः
प्रणयिनि शार्ङ्गिणि भागधेयभूम्ना॥ २४.७१ ॥

रविरुचिरमणिप्रदीपकेषु
स्फुरदसितागुरुधूमधूपितेषु।
सह युवतिगणैः क्षणोपमेयाम्
अनयत वासगृहेषु वासतेयीम्॥ २४.७२ ॥

पुलकितवपुषां सवेपथूनां
घनरसभावितधर्मबिन्दुभाजाम्।
श्लथमिव सुदृशाममुष्टिमेयं
चिकुरमगुम्भयदद्भुतं चिरेण॥ २४.७३ ॥

स्ववधूरवधूतभौमभावाः
स्वदमानाः स्वयमात्मनैव तृप्तः।
अनुभूय न तृप्यति स्म नाथः
तमपि प्रेमविलीनचेतसस्ताः॥ २४.७४ ॥

चपलप्रतिकूलतीक्ष्णरूक्षाः
स्त्रिय इत्यागमिकैर्निदर्शितार्थः।
प्रथितो यदुवीरवल्लभाभिः
परिवादोऽयमपाकृतः पृथिव्याम्॥ २४.७५ ॥

शरणागतसर्वपापमोक्षे
कृतसङ्कल्पमिहानुभूय कृष्णम्।
परितोऽपि तथाविधानुभूतिः
स्मरलब्धा प्रतिलम्भिता प्रियाभिः॥ २४.७६ ॥

अनघामनपायभक्तिरूपां
अनुभूतिं यदुवीरवल्लभानाम्।
अनुकर्तुमपि प्रवर्तमानैः
अवशैरेव समाहितैरभावि॥ २४.७७ ॥

उदधौ बहवो रमा बभूवुः
यदि वैकैव गृहीतनैकरूपा।
इति नाम विमर्शमादधानाः
दयिताः प्रेक्ष्य ननन्द देववन्द्यः॥ २४.७८ ॥

अजितस्य विशालतुङ्गभूम्ना
भुजमध्येन पयोधरैश्च तासाम्।
इतरेतरसंवृतत्वमासीत्
परिरम्भे परितो मिथः समत्वम्॥ २४.७९ ॥

परिहासकुतूहली प्रियाणां
विहितद्यूतविहारकौतुकानाम्।
उभयत्र जयं जगाद पृष्टः
कितवस्थेयपदे निवेशितः सन्॥ २४.८० ॥

स्वयमादिकविः प्रकल्पिताभिः
प्रणयोल्लङ्घनरौक्ष्यमुत्तितीर्षुः।
प्रहसन् बहुशः प्रहेलिकाभिः
मतिमौढ्यं विदधे मनस्विनीनाम्॥ २४.८१ ॥

एकीभवद्भिरयुतैरपि मन्मथानां
यत्कान्तिबिन्दु पृषताऽनुकृतिर्न शक्या।
सम्प्रेक्ष्य तं यदुपतिं यमिनोऽपि नूनं
स्त्रीभावमेव मनसा बिभराम्बभूवुः॥ २४.८२ ॥

कृष्णानुभूतिविभवेन कृतार्थभावाः
तद्वल्लभास्त्रिदशमातृतया चकासुः।
यत्पादपङ्कजपरागजुषां शशंसुः
जन्माद्भुतं जगति गुल्मलतादिकानाम्॥ २४.८३ ॥

श्यामो बभूव किमसौ सुदृशां कटाक्षैः
श्यामास्तदन्वयवशादथवा तरुण्यः।

ताभिः किमस्य ववृधे महिमा महीयान्
तासामनेन यदि वेति बुधैः शशङ्के॥ २४.८४ ॥

अग्राम्यमेव परिहासरसं वितेने
नाश्लीलमाह न मृषा न च मर्मभेदी।
धर्माविरुद्धविभवोचितकामकामः
स्त्रीणां वरेण बुभुजे वरदो वरस्त्रीः॥ २४.८५ ॥

ताराभिरिन्दुरिव भानुरिव प्रभाभिः
युक्तो वशाभिरिव वारणयूथनाथः।
विद्याभिरात्मविदिवाभ्यधिकं विरेजे
योगेश्वरो युवतिभिः सह मोदमानः॥ २४.८६ ॥

पायं पायं प्रेयसः कान्तिमाध्वीं
माद्यन्तीभिर्मञ्जुलालापिनीभिः।
प्रत्येकोक्तिश्लाघनप्रीणिताभिः
प्रायो भोगाः पर्यवाह्यन्त ताभिः॥ २४.८७ ॥

करणव्यपायसमये पुनर्भवं
विनिवर्त्य शाश्वतसुखं प्रदास्यता।
स्वपदानुभूतिरुदपादि तादृशी
सुदृशां स्वसम्मतिभृतां गदाभृता॥ २४.८८ ॥

तद्गतेन मनसा विवशानां
तन्मयीकृतधियामिव तासाम्।
अप्रलुप्तरहसामभजेतां
स्वप्नजागरदशे न विशेषम्॥ २४.८९ ॥

श्रियमनपायिनीं वसुमतीमिव दत्तकरां
सह महिषीगणेन विभुरेक इवानुभवन्।
यदुभिरनन्तताक्ष्यर्पृतनेशनिभैः सहितो
निजपदमस्मरन्निह निवासमरोचयत॥ २४.९० ॥

उपचितचित्रधर्ममुपशान्तविपक्षभयं
    मुदितवधूजनः स मुखरं निगमध्वनिभिः।
बहुविधरत्नशालि बहुमान्यसमग्रगुणं
    वलयसमं भुजस्य वसुधावलयं बुभुजे॥ २४.९१॥

अनितरजनलभ्यां प्रीतिमासेदुषीभिः
    सुचिरमनुबभूवे स्वर्गमोक्षातिशायी।
निरुपधिकरसाब्धिं निर्विशन्तीभिराद्यः
    कुलयुवतिभिरित्थं कोऽपि शृङ्गारभूमा॥ २४.९२॥

सहजबलसमेतः शक्रपूर्वैरजय्यः
    समुदितविषमास्त्रस्तादृशानन्दहेतुः।
अविदितरचनेन स्वेन पार्थाय गीतः
    स्वयमजनि स कामः कोऽपि धर्माविरुद्धः॥ २४.९३॥

स्वपदनलिनभाजां स्वर्गमोक्षौ यथार्हं
    करणविगमकाले कल्पयिष्यन् क्रमेण।
मधुरिपुरिह नूनं मन्दपुण्यैरलभ्यौ
    समतनुत विहारैस्तावुभौ सम्प्रयुक्तौ॥ २४.९४॥

नारीदृष्ट्या नियमितधियो नाकनाथेश्वरत्वं
    सम्भोगे च प्रवणमनसः शाश्वतं ब्रह्मचर्यम्।
अत्रैकस्यां पुरि निवसतः सर्वलोकाधिकत्वं
    निध्यायन्तस्त्वरितमतरन् दुस्तरां तस्य मायाम्॥ २४.९५॥

आसीदेवं परिणतमधिद्वारकं द्वापरान्ते
    व्यासप्रख्याविभजनभवद्वेदशाखोपमानाम्।
चिन्तातीतं यदुपतिमनःप्रीतिचिन्तामणीनाम्
    एकं तासां भवरसभुजां भाग्यमेकातपत्रम्॥ २४.९६॥

गुरुभिरनघचित्तैराहितोदारभूमा
    सुरभितरसमेतत्सूनृतं वेङ्कटेशः।

व्यतनुत यदुवीरप्रीतिमिच्छन् प्रभूतां
कविकथकमृगेन्द्रः क्षेमदं काव्यरत्नम्॥ २४.९७ ॥

॥ इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु यादवाभ्युदये माहाकाव्ये
चतुर्विंशः सर्गः ॥